इति भार० । जीवे च “अजोनित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे” इति गीता । “जहात्येनां भुक्तभोगामजोऽन्य इति” श्रुतिः । स हि स्वोपाधिभूत बुद्धिनिष्ठकर्म्मभिरारब्धदेहमधिष्ठाय बुद्धिनिष्ठकर्त्तृत्वादिक-मात्मन्यभिमन्यमानः जीव इति व्यवह्रियते “न जायते म्रियते वा कथञ्चित् नायं भूत्वा भविता वा न भूय” इति गीतायां तस्य जन्मादिशून्यत्वमुक्तं तच्च “जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति” यास्कोक्तषड्भाव-विकाराणामुपलक्षणमाद्यन्तयोः जन्मनाशरूपविकारयो रभा-वकथनेन तदन्तःपातिनामपि सन्दंशपतितन्यायेन ग्रहणा-वश्यम्भावात् । स च ब्रह्माभिन्न एवेति वेदान्तिमतम् बुद्धिरूपो-पाधीनां नानात्वात् न सर्व्वव्यवहारसाङ्कर्य्यम् । बहव इति साङ्ख्यादयः “जन्मादिव्यवस्थातः पुरुषबहुत्वमिति” पुरुष-स्योपाधिभूतबुद्धिभेदेऽपि “उपाधिर्भिद्यते न तु तद्वानिति” सूत्रेण उपाधिभेदेऽपि उपहितस्यैकत्वेन न भेदः, विशिष्ट-स्यानतिरिक्ततया न जन्मादिव्यवस्थेति पुरुषबहुत्वमङ्गी-चक्रुः कर्त्तृत्वादिकं बुद्धिगतमपि स्वोपाहितचैतन्ये एव प्रतिविम्बति तेन तदविविक्तचैतन्ये तदवभासात् पुरुषस्य भोगः, “चिदवसानोभोग इति” सूत्रे तथैव प्रतिपादनात् एवञ्च यावत्यः बुद्धिव्यक्तयस्तावन्त एव पुरुषाः स्वस्वोपाधिकृतं कर्म्मादिकं स्वकर्त्तृकतया अभिमन्यमानास्तत्प्रयुक्तं सुख-दुःखादिकमात्मीयत्वेन अभिमन्यमानाः भोक्तारइति व्यव-ह्रियन्ते अतएवोक्तम् “बुद्धेर्भोग इवात्मनीति” । “कामः सङ्कल्पो चिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवेति” श्रुतेः ज्ञानादिवृत्तीनां मनोजन्यत्वात् मनोधर्म्मत्वम् सांख्यवेदान्तिनोस्तुल्यम् जीवस्य विभुत्वाङ्गी-कारेऽपि स्वोपाधिबुद्ध्यधिष्ठानदेह एव विशेषसंयोगात् तत्रैव आत्मत्वाभिमानः नान्यदेहेषु, तेषां स्वभोगार्थं स्वोपाधिबुद्धिकृतकर्म्मारब्धत्वाभावात् । एवं सुखदुःखानुस-न्धानमपि स्वोपाधिकृतकर्म्मविशेषादेवेति तत्तद्भेदव्यवस्थेति । ज्ञानकारणमनसाञ्च पुरुषभेदेन भिन्नत्वात् न परानुसन्धा-नेनापरस्यानुसन्धानप्रसङ्ग इति सांख्यवेदान्तयोस्तुल्यम् । विशिष्टस्यातिरिक्तत्वानतिरिक्त एव तयोर्विसंवादः । नैया-यिकवैशेषिकादयस्तु ज्ञानादयो जीवधर्म्माः जीवाश्च बहवः नित्या विभवश्च कर्त्तृत्वं भोक्तृत्वञ्च जीवाना-मेव धर्म्माः, तेषां विभुत्वेऽपि स्वादृष्टारब्धदेहेष्वेव संयोग-विशेषः सएव जन्म, तद्वियोगश्च मरणमित्येव विशेषः न तु स्वतो जन्मनाशाविति स्वीचक्रुः । तेन तन्मतेऽपि न अज-त्वव्याघातः । एवं सर्व्वदर्शनाङ्गीकृतमरणावजत्वम् । माध्वास्तु जीवस्याणुत्वमीश्वरादुत्थितत्वञ्च “एतस्यैव विस्फुलिङ्गाव्युच्चरन्तीति” श्रुतेस्तत्रैव तात्पर्य्यात् “बाला-ग्रशतधारस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेय” इत्युक्तेश्च जीवस्याणुत्वम् अणुत्वेऽपि तेषां सर्व्व-देहगतसुखाद्यनुसन्धानं गुणद्वारैव, यथा गृहैकदेशस्थितं कस्तूरीप्रभृतिसुगन्धिद्रव्यं सौरभेण सर्वं गृहमामोदयति एवं हृदयस्थं विस्फुलिङ्गरूपं चैतन्यं सर्वदेहगतं प्रकाशं कुर्वत् शब्दादीन् विषयांश्चावभासयत् सर्वव्यापीत्युच्यते न तु स्वरूपतः “अणोरणीयान् महतो महीयानिति” श्रुतेः स्वरूपगुणाभ्यां अणुत्वमहत्त्वयोः सम्भवपरतायामेव तात्-पर्य्यात् । अजत्वव्यपदेशस्तु भूतारब्धत्वाभावकृतं गौणमतो-ऽत्र अजशब्दो भाक्त एव इत्युररीचक्रुः । चार्वाकमते तु आत्मनो नाजत्वं देहाकारपरिणतभूतचतुष्टयस्यैव तेषां मते जीवत्वात् तद्विवरणं चेतनशब्दे वक्ष्यते । सौगतादिमते तु जीवानां संविदनतिरिक्ततया सर्व-संविदनुस्यूतत्वात् जन्मान्तरभाविनः अपवर्गरूपफलादेः स्वीकाराच्च नित्यत्वं, नित्यत्वाच्च अजत्वमिति भेदः । “सत्वं रजस्तम इति प्रकृते र्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेति संज्ञा” मित्यु-क्तेश्च ईश्वरस्यैव स्वोपाधिमायागतसत्वरजआद्युपाधिभिः जन्मस्थितिनाशनरूपकार्य्यकरणार्थमायाविर्भावात् अजस्वरू-पाननतिरेकात् तेषामजत्वं तेन ब्रह्मणि, विष्णौ, हरे च पु० । न जायते इत्यजा । सांख्यमतसिद्धप्रधानापरपर्य्याये साम्यावस्थापन्नसत्वरजस्तमोरूपगुणत्रयात्मके स्त्री । “अजा-मेकां लोहितशुक्लकृष्णवर्णाः सरूपाः बह्वीः प्रजाः सृज-मानामिति” श्रुतिः । सत्वादिगुणानुसारेण श्वेतादिरूप-युक्तबहुकार्य्यस्रष्टृत्वाच्च तस्याः नानावर्णत्वमिति सांख्याः । वेदान्तिनस्तु एतां श्रुतिं तेजोऽबन्नरूपपरतया व्याचक्रुः । तथा हि “हन्ताहमिमास्तिस्रो देवता अनेन जीवेना-त्मनानुप्रविश्य नामरूपे व्याकरवाणीति” तेजोऽबन्नाभि-मानिनीस्तिस्रो देवता अनुप्रविश्येत्युक्तेः प्रक्रान्ततेजोऽ-बन्नानामेव भौतिकसृष्ट्युपादानत्वावगमात् तासामेव प्रकृतित्वेन अजत्वम्, तासाञ्च लोहितादिरूपाणि तत्प्रक-रणशेषे उक्तानि “यल्लोहितं रूपं तत्तेजसो रूपं, यच्छुक्लं तदपां, तत् कृष्णं तदन्नस्येति” । एवञ्चोक्तश्रुत्युक्तलोहिता-दिरूपाणामेवेह श्रुतौ प्रत्यभिज्ञानात् अजाशब्देन तेजोऽ-बन्नरूपप्रकृतेर्ग्रहणमिति” तेन अजामित्यादिश्रुतौ अजा-